# Mantramanasikasnana Stotram

# મન્ત્રમાનસિકસ્નાનસ્તોત્રમ્

## Document Information

Text title : Mantramanasikasnana Stotram

File name : mantramAnasikasnAnastotram.itx

Category : devii, devI

Location : doc_devii

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Latest update : January 18, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 1, 2020

*sanskritdocuments.org*

# મન્ત્રમાનસિકસ્નાનસ્તોત્રમ્

સઙ્કલ્પમ્ ।

ૐ

અલિનીલઘનશ્યામં નલિનાયતલોચનમ્ ।
સ્મરામિ પુણ્ડરીકાક્ષં તેન સ્નાતો ભવામ્યહમ્  ॥

ધ્યાનમ્ ।

અનન્તાદિત્ય સઙ્કાશં વાસુદેવં ચતુર્ભુજમ્ ।
શઙ્ખચક્રગદાપદ્મધારિણં વનમાલિનમ્ ॥

શ્યામલં શાન્તહૃદયં પ્રસન્નવદનં શુભમ્ ।
દિવ્યચન્દનલિપ્તાઙ્ગં ચારુહાસં સુવીક્ષણમ્ ।
વનમાલાપરિવૃતં નારદાદિભિરર્ચિતમ્ ॥

સુવર્ણકઙ્કણૈર્દીપ્તં કિઙ્કિણીભિર્વિરાજિતમ્ ।
કેયૂરહારિણં દેવં સુવર્ણમકુટોજ્જ્વલમ્ ।
અનેકરત્નસઞ્છન્ન સ્ફુરન્મકરકુણ્ડલમ્ ॥

પાદપદ્મસુશોભિતમ્ ।

તત્પાદપઙ્કજાદ્ગઙ્ગાં પ્રવહન્તીં સ્વમૂર્ધનિ ।
ચિન્તયે બ્રહ્મરન્ધ્રેણ પ્રવિશન્તીં સ્વકાં તનુમ્ ॥

તયા સંક્ષાલયે દેહં બાહ્યમાભ્યન્તરં મલમ્ ।
અન્તર્બહિશ્ચ શુદ્ધ્યન્તં બાહ્યમભ્યન્તરાણિ ચ ॥

મન્ત્રમ્ ।

ૐ -

નમઃ શિવાયૈ ગઙ્ગાયૈ શિવદાયૈ નમો નમઃ ।
નમસ્ત્રિપથગામિન્યૈ મન્ત્રમૂર્ત્યૈ નમો નમઃ ॥

અચ્યુતો હમનન્તો હં ગોવિન્દો હમહં હરિઃ ।

આનાદો હમશેષો હં અજો હમમૃતો સ્મ્યહમ્ ॥

નિત્યો હં નિર્વિકલ્પો હં નિરાકારો હમવ્યયઃ ।
સચ્ચિદાનન્દરૂપો હં પરિપૂર્ણો સ્મ્યહં સદા ॥

પરિભાષા -
ઇડા ભાગીરથી ગઙ્ગા પિઙ્ગલા યમુના સ્મૃતા ।
તયોર્મધ્યે ગતા નાડી સુષુમ્નાઽઽખ્યા સરસ્વતી ॥

ધ્યાનહ્રદે જ્ઞાનજલે રાગદ્વેષમલાપહે ।
યો સ્નાતિ માનસે તીર્થે સ યાતિ પરમાં ગતિમ્ ॥

ફલશ્રુતિઃ -
ઇદં માનસિકસ્નાનં પ્રોક્તં હરિહરાદિભિઃ ।
સાર્ધત્રિકોટિ તીર્થેષુ સ્નાનાત્કોટિગુણાધિકમ્ ॥

યો નિત્યમાચરેદેવં સ વૈ નારાયણઃ સ્મૃતઃ ।
કાલમૃત્યુમતિક્રમ્ય જીવત્યેવ ન સંશયઃ ॥

ઇતિ મન્ત્રમાનસિકસ્નાનસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by PSA Easwaran

*Mantramanasikasnana Stotram*

pdf was typeset on March 1, 2020

Please send corrections to *sanskrit@cheerful.com*